(क) सर्वभूतहितसाधनं .......................... परमं लक्ष्यमस्ति ।

(ख) निजत्व – परत्वभावकल्पनन्तु .......................... सम्मतम् ।

(ग) .......................... तु वसुधैव कुटुम्बकम् ।

(घ) .......................... इति वदतो वेदस्याप्येतदेवाभिमतम् ।

(ङ) सर्वे सन्तु .......................... ।

(9) (सर्वमिदं, भगवान्, अग्निम्, कोऽसौ यक्ष, तिरोभूतः, ब्रह्म)

(क) पुराकिला .......................... जगदरातीन् जेतुं शक्तिं अददात् ।

(ख) ततो देवाः अग्रणीम् .......................... अब्रुवन् ।

(ग) हे वायो ! गत्वा विजानीहि .......................... इति ।

(घ) इन्द्रः यक्षसमीपमुपसर्पणेन यक्षः .......................... ।

(ङ) सन् यक्षः तत्तु .......................... ।

(च) तस्य भाषा .......................... विभाति ।

**(10)** (सालहतं, सिन्धुवादः, लोहशूलमग्नौ, काष्ठप्रचुरः, सायं, सिन्धौ)

(क) द्वीपः .......................... तत्तेभ्यः फलकानि सम्पादयामि ।

(ख) .......................... च स्ववसतिं भूयः प्रत्यागच्छाम ।

(ग) अहं च .......................... प्रताप्य तम् अमारयम् ।

(घ) .......................... नाम चन्द्रनद्रुमप्रभवं द्वीपम् ।

(ङ) आर्य सोऽहं .......................... ।

(च) जीवितानिराशः .......................... निमज्य पलायामहि ।

**(11)** (खनिजधातुकानन, लसत्यवन्ती, सुसिद्धैर्वन्दितचरणो, नन्दनन्दनेनापि)

(क) महाकाल परिभूषित गेहा .......................... प्रीता ।

(ख) सुरवर – किन्नर – यक्ष .......................... जयतात् ।

(ग) .......................... परिमण्डितसरितां कलकलनादैः ।

(घ) .......................... च यस्यां सकला विद्याऽधीता ।

**(12)** (बहु, प्राणे, जातानि, ज्योतिः, प्रतिष्ठितः)

(क) आनन्देन .......................... जीवन्ति ।

(ख) .......................... शरीरं प्रतिष्ठितम् ।

(ग) अन्नं .......................... कुर्वीत ।

(घ) पृथिव्यामाकाशः .......................... ।

(ङ) अप्सुः .......................... प्रतिष्ठितम् ।

**(13)** (अर्थसिद्धिं, विन्दते, धार्मिकं, मार्दवं, रूपं–श्रुतं, मनसा)

(क) तपसा .......................... महत् ।

(ख) .......................... परामिच्छन् ।

(ग) कर्मणा .......................... वाचा ।

(घ) कृतज्ञं .......................... सत्यम् ।

(ङ) .......................... सर्वभूतानाम् ।

(च) सत्यं .......................... विद्या ।

**(14)** (लब्धकामा, दुर्लभं, कुमाता, क्रियामविवेकः, सङ्कल्पादुपजायते, तीर्थोदकं)

(क) कुपुत्रो जायेत क्वचिदपि .......................... न भवति ।

(ख) याञ्चा मोघा वरमधिगुणे नाऽधमे .......................... ।

(ग) सुलभा रम्यता लोके .......................... हि गुणार्जनम् ।

(घ) .......................... च वह्निश्च नाऽन्यतः शुद्धिमर्हतः ।

(ङ) प्रद्वेषो बहुमानो वा .......................... ।

(च) सहसा विदधीत न .......................... परमापदां पदम् ।

**प्र.10 अधोलिखित प्रश्नानाम् उत्तराणि एकवाक्येन लिखत –**

**(नीचे लिखे प्रश्नों के उत्तर एक वाक्य में लिखो –)**

(1) त्रैलोक्यनाथः किं विदधाति ?

(2) किं निमितं सत्यमुखम् अपावृणोतु ?

(3) दूरङ्गमं ज्योतिषां ज्योतिः कीदृगस्ति ?

(4) कैः तनूभिः आयु व्यशेमहिः ?

(5) सरस्वत्याः मुखस्य किमुपनम् ?

(6) माधवः कुत्र वसति स्म ?

(7) ब्राह्मणी बालापत्यस्य रक्षार्थं कम् अवस्थाप्य स्नातुं गता ?

(8) राज्ञः कस्मै धनं दातुम् आह्वानमागतम् ?

(9) माधवः कं बालकरक्षायां व्यवस्थाप्य गतवान् ?

(10) तपोवनगतो जनः कैः धृष्टमुत्सार्यते ?

(11) मनस्विनो वनमभिगम्य किमर्थं वसन्ति ?

(12) यौगन्धरायणः किं याचितुमिच्छति ?

(13) सुखदायकानि कानि ?

(14) स्वप्नवासवदत्तम् इत्यस्मिन्नाटके कति अङ्काः सन्ति ?

(15) विज्ञानम् इत्युक्ते किम् ?

(16) सुश्रुतप्रयुक्ताः सीवनप्रकाराः के ?

(17) पारदं नाम किम् ?

(18) पञ्च भारतीयवैज्ञानिकानां नामानि लिखत ?

(19) आधुनिक भारतीय समाजस्य उत्तरदायित्वं किम् ?

(20) हृदयस्य व्याख्यातारौ वैदेशिकौ कौ ?

(21) छिद्रेष्वनार्थाः कदा बहुली भवन्ति ?

(22) चन्द्रकान्तः कदा द्रवति ?

(23) तरवः कैः नम्राः भवन्ति ?

(24) सत्पुरुषाः समृद्धिभिः कथं भवन्ति ?

(25) कः पन्थाः ?

(26) कः धृतः शरीरेण मृतः जीवति ?

(27) षड्वेदाङ्गानि कानि ?

(28) शिक्षायाः षडध्यायाः के ?

(29) कल्पशास्त्रस्य प्रयोजनं किम् ?

(30) निरुक्तं नाम किम् ?

(31) व्याकरणशास्त्रं किमर्थम् आवश्यकम् अस्ति ?

(32) अहमवलोक्य किम् अचिन्तयम् ?

(33) महर्षिजाबालिः कुत्र उपविष्टः दृष्टः ?

(34) केषां तेजांसि दुरभिभवानि भवन्ति ?

(35) महर्षिः सन्तोषामृतरसस्य कः ?

(36) तेजस्विनां अग्रणी कः ?

(37) कलहः कयोः मध्ये प्रवृत्तम् ?

(38) कञ्चुकी किं विज्ञापयति ?

(39) दैवेन किमनुष्ठितम् ?

(40) चाणक्यः राक्षसं प्रति किं वदति ?

(41) प्रतापसिंह् कस्य दुर्गस्य शासकः आसीत् ?

(42) प्रतापसिंह् कियत् कालपर्यन्तं जन्मनगरं गन्तुं नेच्छति ?

(43) जन्मधरायाः स्वतन्त्रताप्राप्तिपर्यन्तं प्रतापः कुत्र निवासाय प्रतिज्ञातवान् ?

(44) केन कृता प्रतिज्ञा व्यर्था नाभवत् ?

(45) कस्य जननी धन्या ?

(46) कस्य कीर्तिः भुवनैकभूषा भवति ?

(47) 'स्वाहा' इत्यस्य कः अर्थः ?

(48) ज्ञानिनस्तत्वदर्शिनश्च कुत्र प्रवर्तन्ते ?

(49) दुष्कृतं किं जनयति ?

(50) विश्वधर्मत्वं कथं सम्भवति ?

(51) भगवान् देवेभ्यः किं निमित्तं शक्तिमअददात् ?

(52) अग्नेः सामर्थ्यं किम् ?

(53) वायोः सामर्थ्यं किम् ?

(54) इन्द्रेण विद्यया किं पृष्टम् ?

(55) देवाः किं व्यजानन्त ?

(56) परं तपः कः ?

(57) माता कस्याः मूर्तिः ?

(58) बालात् अपि किं ग्राह्यम् ?

(59) मौनात् किं विशिष्यते ?

(60) अमित्रात् किं ग्राह्यम् ?

(61) बलेः एका कन्या किम् अब्रवीत् ?

(62) जठरस्थोऽहिः कथं वायुम् अश्नाति ?

(63) राजपुत्रः कस्योपरि कृतमूर्धा प्रसुप्तः ?

(64) कन्या आवासरक्षायौ कं निरूपितवती ?

(65) कन्या कानि–कानि वस्तूनि क्रेतुं गतवती ?

(66) सिन्धुवादः अन्ततः कुत्र गतवान् ?

(66) द्वितीये द्वीपे निशायां भीतिः कुतो अभवत् ?

(68) सिन्धुवादः कति सहचराभ्यां प्रथमद्वीपात् कुत्र च पलायितः ?

(69) नररूपः पिशाचः किं कृतवान् ?

(70) पोताध्यक्षः सिन्धुवादं किमर्थम् अभिनन्दयामास ?

(71) मध्यप्रदेशस्य सुन्दरवेशः कीदृगस्ति ?

(72) नन्दनन्दनेन मध्यप्रदेशे किं कृतम् ?

(73) मध्यप्रदेशस्य सुन्दरवेशः कथं भाति ?

(74) जनः निःक्लेशः कथं भवति ?

(75) मध्यप्रदेशस्य सरितः कथं मण्डिताः सन्ति ?

(76) अञ्जलिसमूहयुक्तः कमलसमूहः कथं राजति ?

(77) भ्रमराः कुत्र विश्राममकुर्वन् ?

(78) तारागणः कं स्तबकयति ?

(79) यामिनीकामिनीकर्णाभरणं किम् ?

(80) ब्रह्मणः वाहनं किमस्ति ?

(81) विवादः कयोर्मध्ये संवृत्तः ?

(82) विवादस्य निर्णायिका का आसीत् ?

(83) पक्षिपातिनौ कौ ?

(84) पाठ्यांशे कति अभिनेतारः सन्ति ?

(85) प्राश्निकपदं का अलङ्कृतवतो ?

(86) विदुलां कीदृशं पुत्रं प्रतिबोधयति ?

(87) कस्य जीवितम् अर्थवत् भवति ?

(88) कः मातुसच्चारः अस्ति ?

(89) अनित्यता कुत्र भवति ?

(90) किं व्यजानात् ?

(91) परमे व्योमन् का प्रतिष्ठिता ?

(92) अन्नवान् कथम् महान् भवति ?

(93) कं न प्रत्याचक्षीत् ?

(94) अन्नं कथं राध्यते ?

(95) के के गुणाः पुरुषं दीपयन्ति ?

(96) कानि भूति कुर्वन्ति ?

(97) किमर्थं कल्याणमाचरेत् ?

(98) स्वर्गयोनयः के ?

(99) कस्यावृत्तिभयं नास्ति ?

(100) रमणीयतायाः स्वरूपं किम् ?

(101) सङ्कल्पात् किम् उपजायते ?

(102) पुण्येन किं भवति ?

(103) पुरुषैः सदा केषु प्रयत्नः करणीयः ?

प्र..11 **अधोलिखित–अशुद्धकारक वाक्यानां शुद्धिं कुरुत–**
**(नीचे लिखे अशुद्ध कारक वाक्यों की शुद्धि करो –)**

(1) सर्वे प्राणेन जीवन्ति।
(2) द्वौ द्वौ चत्वारो भवन्ति।
(3) सर्वे बालका् धावति।
(4) सः मोदकं खादसि।
(5) दशरथः अयोध्यायाः नृपः अस्ति।
(6) सः श्वः अस्मान् पाठयति।
(7) अहम् आपणं गच्छति।
(8) आवां पुस्तकानि पश्यामि।
(9) मम शरीरः व्यथितः ।
(10) पत्राः पतन्ति।
(11) सर्वे बालका धावन्ति।
(12) मेघात् आपः वर्षति।
(13) एषा आत्मा दुःखी भवति।

(14) जलाशयं गम्भीरं वर्तते।
(15) युवां नदी पठामः।
(16) त्वं व्यर्थ वदति।
(17) भवान् कुत्र पश्यसि।
(18) वयं ह्यः मन्दिरं गच्छामः।
(19) त्वं जलं पिवस्यसि।
(20) रामः लक्ष्मणेन सह वनम् अगच्छम्।
(21) अहं परश्वः पाठशालां गच्छामि।
(22) दम्पती आगतः अत्र।
(23) शरीरे बहुः अस्थि अस्ति।
(24) आचार्यपादे के जीवनम्।
(25) ते प्रातः देवालये अर्चसि।
(26) ते क्रीडा क्षेत्रे धावथ।
(27) सः पुस्तकम् ददासि।
(28) तम् बालकाय फलं यच्छ।
(29) त्वम् नगरम् अगच्छत्।
(30) तौ कदापि स्वकार्यं न अकरोत्।
(31) वीरः युद्धे शत्रून् जेष्यन्ति।
(32) गुरवः विद्यालयात् आगमिष्यति।
(33) यूयम् विद्यालयं गच्छतम्।
(34) वयं श्वः न पठिष्यावः।
(35) अहं तुभ्ये न पश्यामि।
(36) अहं पुष्पाणां पश्यामि।
(37) कस्यचित् बालकानां पठनं श्रेष्ठम् भवति।
(38) तस्मात् सरोवरे हंसाः तरन्ति।
(39) केन कारणात् त्वं न पठसि।
(40) अस्मिन् बालकेषु सः श्रेष्ठः।
(41) त्वं ग्रहे गच्छसि।
(42) शिवः त्वं न पश्यसि।
(43) धनस्य विना सुखं न भवति।
(44) अन्तरेण हरेः न सुखम्।
(45) बालकः मित्रम् पुस्तकम् यच्छति।
(46) वानरः वृक्षस्य पतति।
(47) राज्यपालः कर्मचारिणां वेतनं यच्छति।
(48) सेवकः स्वामिनं फलं नीतवान्।
(49) सः पुष्पाणाम् स्प्रह्यति।
(50) रामः शत्रुम् क्रुध्यति।
(51) मम पठनं रोचते।

(52) वानरः वृक्षे आरोहति।
(53) अन्तरेण हरेः न सुखम्।
(54) दिलीपः कक्षायां प्रविशति।
(55) सिंह शशकाः व्यापादयति।
(56) व्याधः मृगेषु हन्ति।
(57) मम उभयतः बालकाः क्रीडन्ति।
(58) तव धिक्।
(59) अन्तरा तव हरिः।
(60) रामस्य समया लक्ष्मणः तिष्ठति।
(61) मम सायङ्काले क्रीडनं रोचते।
(62) त्वाम् नमः।
(63) पठनस्य प्रयत्नं कुरु।
(64) बालकः मित्रम् द्रुह्यति।
(65) कृषकः अन्नस्य क्षेत्रम् कर्षति।
(66) छात्राः ज्ञानम् पुस्तकम् पठन्ति।
(67) अनौ स्वाहा।
(68) कौत्सः गुरूम् दक्षिणां ददाति।
(69) श्री गणेशं नमः।
(70) सरस्वती नमः
(71) नृपः ब्राह्मणाय धेनुः अयच्छत्।

प्र.12 **अधोलिखितशब्दानां प्रकृतिं प्रत्ययं च पृथक्कुरुत–**
**(नीचे लिखे शब्दों के धातु एवं प्रत्यय अलग करो–)**

| | | | |
|---|---|---|---|
| पठितः | मुक्त्वा | धावन् | दत्वा |
| उक्तः | उपभुज्य | कुर्वन् | दातुम् |
| हसितः | दृष्टः | याचमानः | आगत्य |
| पातुम् | कुपितवान् | आसीनः | पूजितः |
| हन्तुम् | पृच्छन् | शृण्वन् | तृप्तः |
| लब्धवान् | लभमानः | कथितवान् | रचितः |
| पठनीय | लब्धुम् | भक्षितः | हृतः |
| चिन्तनीय | पठ्यमानः | पीतः | पठितवान् |
| कुर्वन् | भूतवान् | कृतवती | क्रीतवान् |
| कृत्वा | आपीय | आहूतः | हसन् |
| ज्ञात्वा | अनुश्रूय | गतः | पिबन् |
| विज्ञाय | अवमुच्य | कथितम् | गच्छन्ती |
| श्रुतवान् | प्रस्थाय | पठित्वा | अर्चन्ती |
| ज्ञायमानः | संगृह्य | हसित्वा | सहमाना |
| गन्तुम् | दीयमानः | नीत्वा | जेतुम् |

प्र.13 **अधोलिखित–अव्ययान् योजयित्वा वाक्यनिर्माणं कुरुत–**
**(नीचे लिखे अव्ययों से वाक्य बनाओ –)**

| | | | |
|---|---|---|---|
| यत्र–तत्र | इति | परश्वः | सर्वत्र |
| यदा–तदा | इव | परह्यः | अन्यत्र |
| यथा–तथा | एव | अधुना | च |
| यावत्–तावत् | कदा | किमर्थम् | किल |
| यत्–तत् | कुतः | अत्र | खलु |
| इतस्ततः | श्वः | तत्र | हि |
| अपि | ह्यः | कुत्र | |

प्र.14 **अधोलिखित गद्यांशानाम् उत्तराणि लिखत–**
**(नीचे लिखे गद्यांशों के उत्तर लिखो–)**

**(1)** अस्ति उज्जयिन्या माधवो नाम विप्रः। तस्य ब्राह्मणी प्रसूतबालापत्यस्य रक्षार्थं ब्राह्मणमवस्थाप्य स्नातुं गता। अथ ब्राह्मणाय राज्ञः धनं दातुमाह्वानमागतम्। तच्छ्रुत्वा ब्राह्मणः सहजदारिद्र्यादचिन्तयत्–'यदि सत्वरं न गच्छामि तदाऽन्यः कश्चिदपि धनं ग्रहीष्यति'

(क) उज्जयिन्यां कः विप्रः आसीत् ?
(ख) ब्राह्मणी कुत्र गता ?
(ग) ब्राह्मणः किमचिन्तयत् ?
(ध) ब्राह्मणी कस्य रक्षार्थं ब्राह्मणम् अवस्थापितम् ?
(ड) ''अवस्थाप्य'' इत्यस्य पदस्य प्रकृति– प्रत्ययं च प्रथक्कुरुत।

**(2)** किन्तु बालकस्यात्र रक्षको नास्ति, तत्किं करोमि ? यातु चिरकाल पालितमिमं नकुलं पुत्रनिर्विशेषं बालकरक्षायां व्यस्थाप्य गच्छामि। तथा कृत्वा गतः। ततस्तेन नकुलेन बालकसमीपमागच्छन् कृष्णसर्पो दृष्ट्वा व्यापाद्य कोपात्खण्डं खण्डं कृत्वा खादितः। ततोऽसौ नकुलो ब्राह्मणमयान्तमवलोक्य रक्तविलिप्तमुखपादः सत्वरमुपागम्य तच्चरणयोर्लुलोठ।

(क) ब्राह्मणः बालकरक्षायां कं व्यवस्थापितः ?
(ख) नकुलः किं दृष्टवान् ?
(ग) नकुलः कं खण्डं खण्डं कृतवान् ?
(ध) ब्राह्मणमयान्तमवलोक्य नकुलः किं कृतवान् ?
(ड) ''कृत्वा'' इत्यस्य पदस्य प्रकृति–प्रत्ययं च पृथक्कुरुत।

**(3)** संस्कृत ज्ञानस्य विज्ञानस्य च भाण्डागारम् अस्ति। संस्कृतभाषया अस्पृष्टः विज्ञानस्य कोऽपि भागः प्रायः नास्ति। संस्कृतवाङ्मये यत् यत् ज्ञानं निहितमस्ति

तत् विज्ञानसमन्विमस्ति। ''मोक्षेधीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः'' इति अमरकोशकारस्य वचनेन विज्ञानं नाम भौतिकं त्रैवार्गिकं ज्ञानमित्यर्थः स्वीक्रियते।

(क) संस्कृतं कस्य भाण्डागारम् अस्ति ?

(ख) किन्नाम विज्ञानम् ?

(ग) अमरकोशस्य वचनं किम् ?

(ध) संस्कृतभाषया कः अस्पृष्टः नास्ति ?

(ङ) ''वचनेन'' इत्यस्य पदस्य विभक्तिं वचनं च लिखत।

**(4)** 'प्लास्टिक सर्जरी' इत्यस्य आधुनिककाले बहुप्रचारः अस्ति। सुश्रुतसंहितायाः अवलोकनेन बहुकालतः पूर्वमेव भारतीयाः प्लास्टिक सर्जरी जानन्ति स्म इति अवगम्यते । न केवलं तत् अपितु स्वस्तिक–सन्दंश–ताल–नाडी–शलाका प्रभृतीनि दशाधिकशतयन्त्राणि सुश्रुतेन प्रयुक्तानि। वेल्लितक–गोफणिका–तुन्नसेवनी ऋजुग्रन्थिप्रभृतिभिः सीवनप्रकारैः अत्यन्तसूक्ष्मशरीरावयवानामपि सीवनं क्रियते स्म।

(क) आधुनिक काले कस्य बहुप्रचारः अस्ति ?

(ख) भारतीयाः प्लास्टिक सर्जरी जानन्ति स्म इति केन अवगम्यते ?

(ग) सुश्रुतेन कानि यन्त्राणि प्रयुक्तानि ?

(ध) कैः शरीरावयवानां सीवनं कियते स्म ?

(ङ) ''अवयवानाम् इत्यस्य पदस्य विभक्तिं वचनं च लिखित ?

**(5)** ''अङ्ग्यन्ते ज्ञायन्ते अमीभिरिति अङ्गानि'' येभ्यः वस्तूनां स्वरूपज्ञानं भवति ते अङ्गानीति व्यवह्रियन्ते। वेदानां स्वरूपज्ञानाय एतानि उपयुक्तानि भवन्तीति वेदाङ्गानीति कथ्यन्ते। सर्वप्रथमं मुण्डकोपनिषदि षद्वेदाङ्गानां क्रम निर्धारितः। तद्यथा–शिक्षा, कल्पः व्याकरणम्, निरुक्तम्, छन्दः, ज्योतिषम् इति।'

(क) अङ्गानां का परिभाषा ?

(ख) कानि वेदाङ्गानि कथ्यन्ते ?

(ग) कस्मिन् ग्रन्थे वेदाङ्गानां क्रमः निर्धारितः ?

(ध) वेदाङ्गानां क्रमः लेखनीयः ?

(ङ) ''कथ्यन्ते'' इत्यस्य धातुं पुरुषं च लिखित।

**(6)** यथा मनुष्यस्य उच्छ्वास–निमित्तं घ्राणेन्द्रियस्य आवश्यकता अस्ति तद्वदेव शुद्धोच्चारणार्थं शिक्षाशास्त्रस्य उपयोगः अस्ति। अतः ''शिक्षा घ्राणं तु वेदस्य'' इति उक्तम्। तैत्तिरीयोपनिषदि शिक्षायाः षडध्यायाः प्रोक्ताः सन्ति। वर्णः, स्वरः, मात्रा, बलं, सामः, सन्तानः, इति। शिक्षायां वेदमन्त्राणाम् उच्चारणप्रक्रियायाः निदर्शनमस्ति।

(क) शिक्षाशास्त्रस्य उपयोगः किमर्थम् अस्ति ?

(ख) वेदस्य ध्राणं का ?

(ग) तैत्तिरीयोपनिषदि के प्रोक्ताः सन्ति ?

(ध) शिक्षायां कस्याः निदर्शनमस्ति ?

(ड) ''शिक्षायाः'' इत्यस्य पदस्य विभक्तिं वचनं च लिखत ?

(7) यज्ञस्य पूर्णपरिचयप्रदानार्थं कल्पशास्त्रस्य रचना कृता। वेदक्रियाणां व्यवस्थितरूपेण सम्पादनार्थम् उपयुक्तं शास्त्रं कल्पशास्त्रमिति कथ्यते। अतः कल्पशास्त्रं वेदपुरुषस्य हस्तौ भवतः। उक्तञ्च हस्तौ कल्पोऽथपठ्यते।

कल्पशास्त्रं सूत्राणां नाम्ना प्रख्यातम् अस्ति। ते च चत्वारि सन्ति। श्रौतसूत्रम्, गृह्यसुत्रम , धर्मसूत्रम्, शुल्बसूत्रम् इति। कम्पसूत्रेषु यज्ञीयानुष्ठानादीनाम् किया प्रक्रिया च विस्तरेणोपन्यस्तेति।

(क) कल्पशास्त्रस्य रचना किमर्थं कृता ?

(ख) किन्नाम कल्पशास्त्रम् ?

(ग) कल्पसूत्रेषु किम् उपन्यस्तमस्ति ?

(ध) कति सूत्राणि सन्ति ?

(ड) ''हस्तौ'' इति शब्दस्य विभक्तिं वचनं च लिखत ।

(8) लोकः स्व वाग्व्यवहारं भाषायाः माध्यमेन एव करोति। भाषायाः शुद्धयर्थं व्याकरणशास्त्रं महत् आवश्यकम् अस्ति। वेदानां रक्षणार्थमपि व्याकरणस्य आवश्यकता वरीवर्ति। व्याकरणशास्त्रस्य प्रवर्तकाः त्रयः मुनयः सन्ति। ते च पाणिनिः कात्यायनः पतञ्जलिः इति। व्याकरणं वेदपुरुषस्य मुखत्वेन स्वीकृतम् अतः उक्तं ''मुखं व्याकरणं स्मृतम्।'' संस्कृतव्याकरणं विश्वस्य सर्वाधिकं वैज्ञानिकं विद्यते।

(क) लोकः वाग्व्यवहारं कया माध्यमेन करोति ?

(ख) व्याकरणशास्त्रस्य प्रणेता के मुनयः ?

(ग) व्याकरणं वेदपुरुषस्य किम् ?

(ध) व्याकरणस्य आवश्यकता किमर्थम् अस्ति ?

(ड) ''मुनयः'' इत्यस्य पदस्य विभक्तिं वचनं च लिखत ?

(9) वेदमन्त्रेषु विद्यमानानां पदानाम् अर्थबोधनार्थं निर्मितग्रन्थस्य नाम एव निरुक्तमित्युच्यते। महर्षिकश्यपप्रणीतस्य निघण्टुग्रन्थस्य टीकारूपग्रन्थः एव निरुक्तम् इति। निरुक्तग्रन्थस्य प्रणेता यास्काचार्यः अस्ति। निरुक्ते चतुर्दशअध्यायाः सन्ति। निरुक्तं वेदस्य श्रोत्रमुच्यते। निरुक्ते संसारस्यादिमनिर्वचन प्रकिया वर्तते।

(क) कं निरुक्तमित्युच्यते ?

(ख) निघण्टु ग्रन्थस्य रचनाकारः कः ?

(ग) यास्काचार्यः कस्य ग्रन्थस्य प्रणेता ?

(ध) संसारस्यादिमनिर्वचन प्रकिया कस्मिन् ग्रन्थे वर्तते ?

(ड) ''निरुक्ते'' इत्यस्य पदस्य विभक्तिं वचनं च लिखत ?

(10) ''छन्दः पादौ तु वेदस्य'' इति वेदपुरुषस्य पादत्वेन छन्दश्शास्त्रं परिगण्यते। अतः वेदमन्त्राणां सम्यक् उच्चारणाय भावबोधनाय छन्दश्शास्त्रस्य अत्यन्तावश्यकता अस्ति। महर्षिः कात्यायनः वदति यत् ''छन्द–ऋषि–देवतादीनां ज्ञानेन विना वेद–मन्त्राध्ययनं यः करोति तस्य अध्ययनमध्यापनं, यजनं याजनञ्च निष्फलं भवति'' इति। संस्कृते छन्दः शास्त्रीयं चिन्तनं द्विविधमेवोपलभ्यते लौकिकं वैदिकञ्चेति। द्विविधमेव छन्दः शास्त्रीयं चिन्तनम् अद्भुतम्।

(क) छन्दश्शास्त्रस्य आवश्यकता किमर्थम् अस्ति ?

(ख) महर्षिः कात्यायनः किं वदति ?

(ग) छन्दश्शास्त्रं वेदपुरुषस्य किम् ?

(ध) छन्दश्शास्त्रीय चिन्तनं कतिविधम् ?

(ङ) ''लभ्यते'' इत्यस्य धातुं पुरुषं च लिखत ?

(11) प्राचीनकालादारभ्य सर्वभूतहितसाधनं मानवस्य परमं लक्ष्यमस्ति। तत्र राष्ट्रदेशादिभेदो विपज्जनक इत्येव मन्तव्यः। यदा स्वार्थबुद्धिर्हीयते तदैव देवत्वं जागर्ति। वेदेषु प्रतिपादितयज्ञप्रक्रियायाम् इदमेव महत्त्वम्। एतदेव यज्ञप्रक्रियायां 'स्वाहा' (स्व–आ,हा,स्वार्थस्य सर्वथा त्यागः), 'इदं न मम इत्यादिभिः पदैर्निर्दिश्यते। तथा च स्वार्थपरिहारपूर्वकं परार्थसाधनं शिक्ष्यते।

(क) मानवस्य परमं लक्ष्यं किम् ?

(ख) विपज्जनकः कः ?

(ग) देवत्वं कदा जागर्ति। ?

(ध) ''स्वाहा'' इत्यस्य शब्दस्य कोऽर्थः ?

(ङ) ''वेदेषु'' इत्यस्य शब्दस्य विभक्तिं वचनं च लिखत।

(12) अस्ति कस्मिंश्चिन्नगरे देवशक्तिर्नाम राजा। तस्य च पुत्रो जठरवल्मीकाश्रयेण रोगेण प्रतिदिनं प्रत्यङ्गं निर्वेदाद्देशान्तरं गतः। कस्मिंश्चिन्नगरे भिक्षाटनं कृत्वा महति देवालये कालं यापयति। अथ तत्र नगरे बलिर्नाम राजाऽऽस्ते।

(क) नगरे कः राजा आस्ते ?

(ख) राजपुत्रः कुत्र गतः ?

(ग) राजपुत्रः कथं कालं यापयति ?

(ध) राजपुत्रः प्रत्यङ्गः केन रोगेण क्षीयते ?

(ङ) ''कृत्वा'' इत्यस्य पदस्य धातुं प्रत्ययं च पृथक्कुरुत।

(13) एवमेकावशेष आत्मोऽपि तामेव गतिं सम्भावयन् जीवितनिराशः सिन्धौ निमज्य मर्तुकामोऽमि भूयो जीवनाशया प्रणोदिता परमेश्वरं भूयो भूयः प्रार्थ्यमानोऽकस्माद् दूरादागच्छत् प्रवहणमेकमपश्यम्। शिरःस्थः पटेन च कृत सङ्केततस्थजनावधानमाकृष्य गृहीतसङ्केतैः पोतवाहैः सपदि सम्प्रषितां नावमेकामारुह्य पोतं संप्राप्नुवम्।

(क) सिन्धुवादः किमपश्यत् ?
(ख) तेन केन सङ्केतः कृतः ?
(ग) के सङ्केतं ग्रहीतवन्तः ?
(घ) पोतवाहैः कां सम्प्रेषितम् ?
(ङ) ''निमज्य'' इत्यस्यपदस्य प्रकृतिं प्रत्ययं च पृथक्कुरुत।

**(14)** आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्वेव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति। सैषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिता। स य एवं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या।
(क) भूतानि कस्मात् जायन्ते ?
(ख) जातानि केन जीवन्ति ?
(ग) परमे व्योमन् का प्रतिष्ठिता ?
(घ) अन्नवान् कः भवति ?
(ङ) ''खल्विमानि'' इत्यस्य पदच्छेदं कुरुत।

**(15)** अन्नं न निन्द्यात्। तद्व्रतम्। प्राणो वा अन्नम्। शरीरमन्नादम्। प्राणे शरीरं प्रतिष्ठितम्। शरीरे प्राणः प्रतिष्ठितः। तदेतदन्नमनं प्रतिष्ठितम् स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या।
(क) कं न निन्द्यात् ?
(ख) प्राणाः कुत्र प्रतिष्ठिताः ?
(ग) अन्नवान् कः भवति ?
(घ) प्राणे किं प्रतिष्ठितम् ?
(ङ) '' निन्द्यात्'' इत्यस्य धातुं लकारं च लिखत।

**(16)** अन्नं न परिचक्षीत। तद् व्रतम्। आपो वा अन्नम्। ज्योतिरन्नदम्। अप्सु ज्योतिः प्रतिष्ठितम्। ज्योतिष्यापः प्रतिष्ठिताः। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या।
(क) कं न परिचक्षीत ?
(ख) ज्योतिः कुत्र प्रतिष्ठितम् ?
(ग) अन्नवान् कः भवति ?
(घ) प्रजया किं भवति ?
(ङ) ''अप्सु'' इत्यस्य पदस्य विभक्तिं वचनं च लिखत ?

**(17)** अन्नं बहु कुर्वीत। तद् व्रतम्। पृथिवी वा अन्नम्। आकाशोऽन्नादः पृथिव्यामाकाशः प्रतिष्ठितः। आकाशे पृथिवी प्रतिष्ठिता। तदेतदन्नमन्ने प्रतिष्ठितम्। स य

एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या।

(क) किं बहु कुर्वीत ?
(ख) आकाशः कुत्र प्रतिष्ठितः ?
(ग) पृथिवी कुत्र प्रतिष्ठिता ?
(घ) अन्नवान् कः भवति ?
(ङ) ''प्रजया'' इत्यस्य पदस्य विभक्तिं वचनं च लिखत।

**(18)** न कंचन वसतौ प्रत्याचक्षीत। तद् व्रतम्। तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात्। आराध्यास्मा अन्नराध्यते। एतद्वै मध्यतोऽन्नराद्धम् मध्यतोऽस्मा अन्नराध्यत। उतद्वा अन्ततोऽन्नराद्धम्। अन्ततोऽस्मा अन्नराध्यते। य एवं वेद।

(क) यया कया च विधया किं प्राप्नुयात् ?
(ख) अन्नं कथं राध्यते ?
(ग) कम् अन्नमित्याचक्षते ?
(ध) किं व्रतं धारणीयम् ?
(ङ) ''बह्वन्नम्'' इत्यस्य पदस्य सन्धि विच्छेदं कुरुत।

**(19)** तस्य च द्वे दुहितरौ तिष्ठतः। ते च प्रतिदिवसमादित्योदये पितुः पादान्तिकमागत्य नमस्कारं चक्रतुः। तत्र चैकाऽब्रवीत्–'विजयस्व महाराज! वस्य प्रसादात्सर्वं सुखं लभ्यते।' द्वितीया तु–'विहितं भुङ्क्ष्व महाराज!' इति ब्रवीति।

(क) के यौवनस्थे तिष्ठतः ?
(ख) ते किं चक्रतुः ?
(ग) प्रथमा किम् अब्रवीत् ?
(घ) द्वितीया किम् अब्रवीत् ?
(ङ) ''दुहितरौ'' इत्यस्य पदस्य मूलशब्दं विभक्तिं च लिखत।

**(20)** पुराकिल भगवान् जगदरातीनीश्वरसेतुभेत्रृन् असुरान् जेतुम् इन्द्रादिभ्यो देवेभ्यः शक्तिम् अदात्। तया तेऽसुरान् पराजित्य अमहीयन्त। ततो देवाः स्वसार्थ्यस्वरूपमहिम्ना एव प्राप्तोऽयं विजय इति अभिमेनिरे। अजानतोऽयं भगवान् मिथ्याभिमानापनोदनेनानुगृह्णीयम् इति अद्भुतेन विस्मापनीयेन यक्षरूपेण देवानां पुरः प्रादुर्बभूव।

(क) भगवान् कान् जेतुम् शक्तिम् अददात् ?
(ख) भगवान् केभ्यः शक्तिम् अददात् ?
(ग) भगवान् किमर्थं देवानां पुरः प्रादुर्बभूव ?
(घ) देवाः किं विचिन्त्य अभिमेनिरे ?
(ङ) ''पराजित्य'' इत्यस्य पदस्य प्रकृतिं प्रत्ययं च पृथक्कुरुत।

प्र.15. **अधोलिखितपद्यांशानाम् उत्तराणि लिखित –**
**(नीचे लिखे पद्यांशों के उत्तर लिखो–)**

**(1)** यंशैवा समुपासते शिव इति ब्रह्मेति वेदान्तिनो,
ब्रौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः।
अर्हनित्यथ जैन–शासन–रताः कर्मेति मीमांसकाः
सोऽयं वो विदधातु वान्छितफलं त्रैलोक्यनाथो हरिः।।

(क) कः वाञ्छित फलं विदधातु ?
(ख) प्रमाणपटवः कै सन्ति ?
(ग) हरिं ब्रह्मेति के मन्यन्ते ?
(घ) मीमांसकाः हरिं किं मन्यन्ते ?
(ड) ''त्रैलोक्यनाथः'' इत्यस्य समासविग्रहं कृत्वा समासनाम लिखत ?

**(2)** ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्।।

(क) किं मा ग्रधः ?
(ख) सर्वं कस्य आवासः ?
(ग) किम् ईशावस्यम् ?
(घ) केन प्रकारेण भुञ्जीथाः ?
(ड) '' भुञ्जीथाः'' इत्यस्य धातुं लकारं च लिखत ?

**(3)** सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः।।

(क) सहसा किं न विदधीत ?
(ख) कः परमापदां पदम् ?
(ग) सम्पदः कं वृणुते ?
(घ) विमृश्यकारिणं पुरुषं के वृणुते ?
(ड) ''परमापदाम्'' इत्यस्य पदस्य सन्धिविच्छेदं कुरुत।

**(4)** परिहरतु भवान् नृपापवादं, न परुषमाश्रमवासिषु प्रयोज्यम्।
नगरपरिभवान् विमोक्तुमेते वनमभिगम्य मनस्विनो वसन्ति।।

(क) भवान् किं परिहरतु ?
(ख) वनमभिगम्य के वसन्ति ?
(ग) आश्रमवासिषु किं न प्रयोज्यम् ?
(घ) मनस्विनः किमर्थं वनमगिम्य वसन्ति ?
(ड) ''परिहरतु'' इत्यस्य पदस्य पदस्य लकारं पुरुषं च लिखत ?

(5) खगाः वासोपेताः सलिलमवगाढो मुनिजनः
प्रदीप्तोऽग्निर्भाति प्रविचरति धूमो मुनिवनम्।
परिभ्रष्टो दूराद् रविरपि च संक्षिप्त किरणो
रथं व्यावर्त्यासौ प्रविशति शनैरस्त शिखरम्।।

(क) के वासोपेताः ?
(ख) के सलिलम् अवगाढः ?
(ग) का भाति ?
(घ) धूमः कुत्र प्रविचरति ?
(ङ) "प्रदीप्तः" इत्यस्मिन् शब्दे कः उपसर्गः ?

(6) भवन्ति नम्रास्तरवः फलोद्गमैः,
नवाम्बुभिर्भूमिविलम्बितो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः,
स्वभाव एवैष परोपकारिणाम्।।

(क) घनाः कदा भूमिविलम्बिनः भवन्ति ?
(ख) समृद्धिभिः के अनुद्धताः भवन्ति ?
(ग) तरवः कदा नम्राः भवन्ति ?
(घ) फलोद्गमैः के नम्राः भवन्ति ?
(ङं) "एवैषः" इत्यस्य सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत।

(7) श्रुतिर्विभिन्ना स्मृतयश्च भिन्नाः
नैको मुनिः यस्य वचः प्रमाणम्।
धर्मस्य तत्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः।।

(क) कस्य तत्वं गुहायां निहितम् ?
(ख) कः पन्थाः ?
(ग) के विभिन्नाः ?
(घ) के भिन्नाः ?
(ङ) "गुहायाम्" इत्यस्य पदस्य विभक्तिं वचनं च लिखत।

(8) अभिमत् पुरा भारत भाविभासकः,
स एकलिङ्गस्य सवङ्घ्र्युपासकः।
महाबली दुर्गचित्तौड–शासकः,
प्रतापसिंहः परताप–नाशकः।।

(क) कः एकलिङ्गस्य उपासकः ?
(ख) प्रतापसिंहः कस्य दुर्गस्य शासकः आसीत् ?
(ग) प्रतापः कस्य नाशकः ?
(घ) प्रतापस्य कानि विशेषणानि सन्ति ?

(ङ) ''परतापनाशकः'' इत्यस्य समासविग्रहं कृत्वा समासनाम लिखत ?

**(9)** अत्स्यामि पत्रपुटके न पुनर्नहेमै,
वत्स्यामि पर्णभवने विजने न हर्म्ये।
स्थास्याम्यहं भुवि तृणासनकेषु तेषु,
न त्वच्छरत्नरचितेषु नृपासनेषु।।

(क) अहं कस्मिन् पात्रे अत्स्यामि ?
(ख) कुत्र वत्स्यामि ?
(ग) भुवि केषु स्थास्यामि ?
(घ) ''स्थास्यामि'' इत्यस्य पदस्य धातुं लकारं च लिखत ?

**(10)** आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः।
माता पृथिव्या मूर्तिस्तु भ्राता स्वो मूर्तिरात्मनः।।

(क) ब्रह्मणः मूर्तिः कः ?
(ख) पिता कस्य मूर्तिः ?
(ग) पृथिव्याः मूर्तिः का ?
(घ) आत्मनः मूर्तिः कः ?
(ङ) ''पृथिव्याः'' इत्यस्य पदस्य विभक्तिं वचनं च लिखत।

**(11)** विषादप्यमृतं ग्राह्यं बालादपि सुभाषितम्।
अमित्रादपि सद्वृत्तममेध्यादपि काञ्चनम्।।

(क) अमृतं कस्मात् ग्राह्यम् ?
(ख) बालादपि किं ग्राह्यम् ?
(ग) सद्वृत्तं कस्मात् ग्राह्यम् ?
(घ) काञ्चनम् कस्मात् ग्राह्यम् ?
(ङ) ''बालात्'' इत्यस्य पदस्य विभक्तिं वचनं च लिखत।

**(12)** अद्भिर्गात्राणि शुद्ध्यन्ति मनः सत्येन शुद्ध्यति।
विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुद्ध्यति।।

(क) भूतात्मा काभ्यां शुद्ध्यति ?
(ख) मनः केन शुद्ध्यति ?
(ग) ज्ञानेन का शुद्ध्यति ?
(घ) ''अद्भिः कानि शुद्ध्यन्ति ?
(ङ) '' अद्भिः'' इत्यस्य पदस्य विभक्तिं वचनं च लिखत।

**(13)** महाकाल–परिभूषित–गेहा लसन्त्यवन्ती प्रीता
कलकलनादैः सिप्रा यस्यां प्रवहति पुण्य– परीता।
कालिदास– बाणादि–कविभिर्गाथा यस्या गीता

नन्दनन्दनेनापि च यस्यां सकला विद्याऽधीता।।

(क) पुण्यपरीता का ?

(ख) अस्याः गाथा कैः कविभिः गीता ?

(ग) अस्यां सकलाविद्यां केन अधीता ?

(घ) के लसन्ति ?

(ङ) ''लसन्त्यवन्ती'' इत्यस्य पदस्य सन्धि–विच्छेदं कृत्वा सन्धिनाम लिखत।

**(14)** बुद्ध्या भयं प्रणुदति तपसा विन्दते महत्।
गुरुशुश्रूषया ज्ञानं शान्तिं योगेन विन्दति।।

(क) कथा भयं प्रणुदति ?

(ख) तपसा किं विन्दते ?

(ग) ज्ञानं केन विन्दति ?

(घ) शान्तिं केन विन्दति ?

(ङ) ''प्रणुदति'' इत्यस्य पदस्य धातुं लकारं च लिखत।

**(15)** व्यतिषजति पदार्थानन्तरः: कोऽपि हेतु–
र्न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते।
विकसति हि पतङ्गस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः।।

(क) चन्द्रकान्तः कदा द्रवति ?

(ख) पुण्डरीकं कदा विकसति ?

(ग) कोऽपि हेतुः पदार्थान् किं करोति ?

(घ) प्रीतयः कान् न संश्रयन्ते ?

(ङ) ''पुण्डरीकम्'' इत्यस्य पर्यायवाचि शब्दं लिखत।

प्र.16 **प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् कण्ठस्थीकृतान् सुभाषितश्लोकान् लिखत।**

प्र.17 **अधोलिखितेषु कश्मिंश्चिदेकविषयस्योपरि टिप्पणी कार्या–**
**(नीचे लिखे किसी एक विषय पर टिप्पणी लिखो–)**

**(क)**

1. रामायणम्
2. महाभारतम्
3. पुराणसाहित्यम्
4. महाकाव्यपरम्परा

**(ख)** अश्वघोषः अथवा कालिदासस्योपरि शतशब्देषु टिप्पणी कार्या!

**(ग)** संस्कृत–गद्यसाहित्य विषये टिप्पणीकार्या–

(घ) संस्कृतस्य पञ्च प्रमुखनाटककाराः तेषां नाटकानां नामानि च लिखत।

प्र.18 **अधेलिखितान् अपठितगद्यांशान् पठित्वा प्रश्नानाम् उत्तराणि लिखत –**
**(नीचे लिखे अपठित गद्यांशों को पढकर प्रश्नों के उत्तर लिखो–)**

(1) एकः काकः। काकः एकदा वनं गच्छति। तत्र सर्वत्र बहु भ्रमणं करोति। काकः वृक्षं उपवसति, बहूनि फलानि च खादति। तदा काकस्य कृते पिपासा भवति। तस्मिन् काले अकालः भवति। काकः सर्वत्र जलस्य–अन्वेषणं करोति, तथापि जलं न मिलति। काकः बहुचिन्तयति, यदि मम कृते जलं न मिलति तदा मम मरणं भवति। तदा काकः अकस्मादेव एकं घटं पश्यति। काकः शीघ्रं घटस्य उपरि उपविशति, जलं पश्यति, किन्तु घटमध्ये जलम् अल्पं भवति। काकः जलं पातु स्वचञ्चुविस्तारं करोति। परञ्च हा। कष्टं, चञ्चुः जलस्पर्शमपि न करोति। काकः अतीव–चतुरः। सः निराशो न भवति काकः शीघ्रम् एकम् उपायं चिन्तयति। काकः गच्छति चञ्चुविस्तारं करोति चञ्चुमध्ये लघु–लधु पाषाण–खण्डान् स्थापयति'। अनन्तरं घटमध्ये पातयति। फलतः जलम् उपरि आगच्छति। काकः चञ्चुविस्तारं करोति। अनन्तरं सानन्दं जलपानं करोति। गच्छति च।

1. गद्यस्य सारं लिखत ?
2. एकदा काकः कुत्र गतः ?
3. काकः दूरात् किम् अपश्यत् ?
4. काकः किम् अपिबत् ?
5. घटे किम् अल्पम् आसीत् ?
6. उपरिलिखितस्य गद्यांशस्य शीर्षकं दीयताम्।

(2) भारतवर्षे षड्ऋतवः भवन्ति। तेषु वसन्तः ऋतुराजः कथ्यते। चैत्रे वैशाखे च मासयोः ऋतुः भवति। वसन्ते द्वौ प्रमुखौ उत्सवौ भवतः वसन्तोत्सवः होलिकोत्सवः च। वसन्तोत्सवे सर्वत्र प्रमोदो भवति। नराः नार्यः च सर्वत्र गायन्ति नृत्यन्ति। होलिकोत्सवः फाल्गुनमासस्य पूर्णिमायां भवति। हर्षातिरेकेण नराः नार्यः युवानः वृद्धाः बालकाः च प्रसन्नाः भवन्ति। जनाः परस्परं रक्तवर्णं च प्रक्षिपन्ति। द्वेष विस्मृत्य सर्वे परस्परं मिलन्ति।

1. गद्यस्य सारं लिखत ?
2. भारते कति ऋतवः भवन्ति ?
3. वसन्तस्य ऋतुः कदा भवति ?
4. वसन्तोत्सवे किं भवति ?
5. होलिकोत्सवे जनाः किं कुर्वन्ति ?
6. उपरिलिखितस्य गद्यांशस्य शीर्षकं दीयताम्।

(3) विद्याधनं सर्वधनप्रधानम् इति सत्यमेव। विद्याधनस्यैवेदं वैशिष्ट्य यत् सर्वधनं व्ययात् क्षयमाप्नोति, परं विद्याधनं व्ययात् वृद्धिं गच्छति। सञ्चयात् नाशमायाति। उक्तमपि केनचित् –

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्।।

ज्ञानार्थकात् विद्–धातो विद्याशब्दः निष्पन्नः। कस्यचिदपि पदार्थस्य सम्यक्ज्ञानं विद्येति कथ्यते। विद्यया वयं स्वकर्त्तव्यं जानीमः। विद्ययैव धर्मज्ञानं भवति। विद्ययैव मानवः सर्वत्र प्रतिष्ठां लभते।

1. उपरिलिखितस्य गद्यांशस्य शीर्षकं दीयताम्।
2. विद्याशब्दः कस्माद् धातोः निष्पन्नः ?
3. विद्याधनस्य किं वैशिष्ट्यम् ?
4. विद्यया किं लभ्यते ?
5. गद्यस्य सारं लिखत ?

(4) सर्वे जनाः संसारे सुखमिच्छन्ति। सुखं च धनेनैव प्राप्तुं शक्यते। अतः धनोपार्जनस्य आवश्यकता भवति। यस्य समीपे धनं भवति, सः सुखेन शेते। निर्धनं पुरुषं मित्राणि अपि त्यजन्ति। चोर्येण, कपटेन, उत्कोचग्रहणेन च प्राप्तं धनं विनाशकरं भवति। कृषिकर्मणा, व्यापारेण, सेवया, परिश्रमेण च प्राप्तं धनं फलति।

1. उपरिलिखितस्य गद्यांशस्य शीर्षकं दीयताम्।
2. संसारे जनाः किम् इच्छन्ति ?
3. सुखं कथं प्राप्तुं शक्यते ?
4. संसारे कः सुखेन शेते ?
5. धनार्जनस्य सर्वोत्तमः उपायः कः ?
6. गद्यस्य सारं लिखत ?

(5) उद्यमः खलु मानवस्य प्रधानतः बन्धुः। अयम् एव मानवस्य विपत्तिं दूरीकरोति। उद्योगिनं विदेशः स्वदेशः इव भवति। खगाः उद्यमेनैव भोजनं सञ्चिन्वन्ति। पिपीलिकाः उद्योगं कृत्वा अन्नम् एकत्रीकुर्वन्ति। उद्योगी मूषकः विडाली दृष्ट्वा धावति। उद्यमी मृगः धावित्वा आत्मानं रक्षति। उद्योगस्य एषः प्रभावः यत् मानवः अद्य मीनः इव जलमध्ये सञ्चरति, खगः इव आकाशे उत्पतति।

1. उपरिदत्तस्य गद्यांशस्य शीर्षकं दीयताम्।
2. मानवस्य प्रधानतमः बन्धु कः अस्ति ?
3. उद्योगिनं किं स्वदेशः इव भवति ?
4. कीदृशः मूषकः विडालीं दृष्ट्वा धावति ?
5. मानवः अद्य खगः इव कुत्र उत्पतति ?
6. गद्यस्यं सारं लिखत ?

(6) महात्मागांधी भारतस्य राष्ट्रपिता कथ्यते। अस्य जन्म गुर्जरप्रदेशस्य पोरबन्दराख्ये नगरे अभवत्। यदाऽयं त्रयोदशवर्षदेशीयस्तदैव 'कस्तूरबा' इति नाम्ना कन्यया सह विवाहितो जातः। कुशाग्रबुद्धिरयं विधिशास्त्रस्योच्चशिक्षां प्राप्तुं विदेशं गतः।

1. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।
2. महात्मागांधी कस्य राष्ट्रपिता कथ्यते ?
3. अस्य जन्म कुत्राभवत् ?
4. सः शिक्षां प्राप्तुं कुत्र गतः ?
5. गद्यस्य सारं लिखत ?

(7) भारतस्य उत्तरायां दिशि महोन्नतः पर्वतराजः हिमालयः वर्तते। सः उत्तरदिशि प्रहरी इव रक्षति। हिमालयः भारतदेशस्य समृद्धः भूभागः अस्ति। अस्मात् पर्वतात् नद्यः निस्सरन्ति देशस्यविशालं भूभागं सिञ्चन्ति च।

1. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।
2. भारतस्य उत्तरायां दिशि कः वर्तते ?
3. प्रहरी इव भारतं कः रक्षति ?
4. भारतदेशस्य समृद्धः भूभागः कः अस्ति ?
5. गद्यांशस्य सारं लिखत ?

(8) संसारे अनेकेषां दुःखानां मूलकारणम् अज्ञानम् एव। अज्ञानात् एव समाजे नानाविकारणां जन्म भवति। हिंसाभ्रष्टाचारादयः ये उपद्रवाः अस्मान् पीड्यन्ति, तेषां मूंले अशिक्षा एव वर्तते। वयं शिक्षायाः प्रकाशेन अज्ञानस्य अन्धकारं हर्तुं सज्जाः भवेम।

1. उपरिलिखितस्य गद्यांशस्य शीर्षकं दीयताम्।
2. दुःखानां मूलकारणं किम् ?
3. समाजे अनेके विकाराः कथं जायन्ते ?
4. के उपद्रवाः अस्मान् पीड्यन्ति ?
5. अज्ञानस्य अन्धकारं हर्तुं वयं किं कुर्याम ?

(9) प्राचीनकाले स्त्रीशिक्षायाः अतीव महत्त्वमासीत्। यवनशासकानां शासनकाले स्त्रीणां शिक्षा परिसमासा। आङ्ग्लीयानां शासनकाले भारतीयाः उच्चशिक्षायै विदेशं अगच्छन्। तत्रत्यानां सर्वतोमुखीम् उन्नतिं विलोक्य ते विस्मिता आसन्। महान् सुधारकः राजा राममोहनरायः स्त्रीशिक्षायाः प्रबलसमर्थकः आसीत्। अस्माकं धर्मसुधारकः स्त्रीशिक्षायै अनेकाः संस्था स्थापिताः तासु सहस्त्रशः कन्याः शिक्षाम् अलभन्त।

1. अस्य गद्यांशस्य शीर्षकं लिखत।
2. स्त्रीणां शिक्षा कदा परिसमाप्ता ?
3. स्त्रीशिक्षायाः कः प्रबलसमर्थकः आसीत् ?
4. धर्मसुधारकैः स्त्रीशिक्षायै किं कृतम् ?

5. गद्यांशस्य सारं लिखत ?

प्र.19 स्वस्य प्राचार्यस्य कृते दिवसत्रयाणां अवकाशार्थं प्रार्थना–पत्रं लिखत।

**अथवा**

स्वस्य पितुः कृते स्वसमाचारान् दातुं–पत्रं लिखत।

**अथवा**

स्वस्य मित्रस्य कृते स्वभगिनी विवाहस्य निमन्त्रण–पत्रं लिखत।

प्र.20 **अधोलिखितेषु कस्यचिदेकस्य विषयस्योपरि शतशब्देषु संस्कृते निबन्धं लिखत– (नीचे लिखे हुए किसी एक विषय पर संस्कृत भाषा में सौ शब्दों में निबन्ध लिखो–)**

1. कालिदासः
2. संस्कृतभाषा
3. संस्कृतसाहित्येतिहासः
4. छात्रजीवनम्
5. मम दिनचर्या
6. सदाचारः
7. परोपकारः
8. विद्या
9. अस्माकं देशः